# २९ एकोनत्रिंश दशकः - देवी पीठोत्पत्तिः

अथैकदाऽदृश्यत दक्षगेहे शाक्तं महस्तच्च बभूव बाला ।
विज्ञाय ते शक्ति मिमां जगत्सु सर्वेऽपि हृष्टा अभवन् क्षणश्च ॥ २९-१॥

दक्षः स्वगेहा पतितां चकार नाम्ना सतीं पोषयति स्म तां सः ।
स्मरन् वचस्ते गिरिशाय काले प्रदाय तां द्वौ समतोषयच्च ॥ २९-२॥

एवं शिवःशक्तियुतः पुनश्च बभूव गच्छत्सु दिनेषु दक्षः ।
दैवाच्छिवद्वेष मवाप देहं तत्पोषितं स्वं विजहौ सती च ॥ २९-३॥

दुःखेन कोपेन च हा सतीति मुहु र्वदन्नुद्धृतदार देहः ।
बभ्राम सर्वत्र हरः सुरेषु पश्यत्सु शार्ङ्गी शिव मन्वचारीत् ॥ २९-४॥

रुद्रां सविन्यस्त सती शरीरं विष्णुः शरौघै र्बहुशश्चकर्त ।
एकैकशः पेतु रमुष्य खण्डा भूमौ शिवे साष्टशतं स्थलेषु ॥ २९-५॥

यतो यतः पेतुरिमे स्थलानि सर्वाणि तानि प्रथितानि लोके ।
इमानि पूतानि भवानि देवीपीठानि सर्वाघहराणि भान्ति ॥ २९-६॥

त्वमेक मेवा द्वयमत्र भिन्न नामानि धृत्वा खलु मन्त्र तन्त्रैः ।
सम्पूज्यमाना शरणागतानां भुक्तिं च मुक्तिं च ददासि मातः ॥ २९-७॥

निर्विण्ण चित्तः स सतीवियोगात् शिवः स्मरंस्त्वां कुहचिन्निषण्णः ।
समाधि मग्नोऽभवदेष लोकः शक्तिं विना हा विरसोऽलसश्च ॥ २९-८॥

चिन्ताकुला मोहधियो विशीर्ण - तोषा महारोग निपीडिताश्च ।
सौभाग्य हीना विहताभिलाषाः सर्वे सदोद्विग्न हृदो बभूवुः ॥ २९-९॥

शिवोऽपि शक्त्या सहितः करोति सर्वं वियुक्तश्च तया जडः स्यात् ।
मा माऽस्तु मे शक्ति वियोग एष दासोऽस्मि भूयो वरदे नमस्ते ॥ २९-१०॥